SPD-354

CC-0 S.P. Dhar Collection. Digitized by eGangotri

CC-0 S.P. Dhar Collection. Digitized by eGangotri

From Library of
Samvit Prakash Dhar
L-3/8 DLF Phase 2,
Gurgaon, HR-122002

CC-0 S.P. Dhar Collection. Digitized by eGangotri

CC-0 S.P. Dhar Collection. Digitized by eGangotri

ओं

श्रीगणेशाय नमः

अथ

लल्लेश्वरीवाक्यानि

श्रीराजानकभास्कराचार्यसंदृब्धसंस्कृतपद्योपेतानि ।

नुत्वा देवं श्रीगणेशं सुरेशं
  स्मृत्वा चित्ते श्रीगुरोः पादुकां च ।
लल्लादेवीप्रोदितं वाक्यजातं
  पद्यैर्दृब्धं रच्यते भास्करेण ॥ १ ॥

अब्यांसि सविकास लय वुंथू ,
  गगनस् सगुण म्यूंलु समिच्रूटा ।
शूंन्य् गलु त अनामय म्वतू,
  इहुय् उपदेश छुय् भटा ॥ १ ॥

अभ्यासेन लयं नीते दृश्ये शून्यत्वमागते ।
साक्षिरूपं शिष्यते तच्छान्ते शून्येऽप्यनामयम् ॥ १ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

वाक् मानस् क्ल अक्ल ना आति,
छ्वपि मुद्रि आति न प्रवेश् ।
रोज़न् शिव शक्त ना आति,
म्वतुयय् कुँह् त सुय् उपदेश् ॥ २ ॥

वाङ्मानसं च तन्मुद्रे शिवशक्ती कुलाकुले ।
यत्र सर्वमिदं लीनमुपदेशं परं तु तत् ॥ २ ॥

लल्ल् ब्वह् द्रायस् लो-लरे,
छाडान् लूस्तुम् दिन क्योह राथ् ।
वुछुम् पण्डित् पननि-गरे,
सुय् म्य रंटुमस् नच्तुर् साथ् ॥ ३ ॥

लल्लाहं निर्गता दूरमन्वेष्टुं शंकरं विभुम् ।
भ्रान्त्वा लब्धो मया स्वस्मिन्देहे देवो गृहे स्थितः ॥ ३ ॥

दमादम् कंरुमस् दमनूहाले,
प्रज़ल्योम् दीप् त ननेयम् ज़ाथ् ।
अंन्द्र्युम् प्रकाश् न्यबर् छंटुम्,
गटि रंटुम् त कंरूमस् थफ् ॥ ४ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

ततः प्राणादिरोधेन प्रज्वाल्य ज्ञानदीपिकाम् ।
स्फुटं दृष्टो मया तत्र चित्स्वरूपो निरामयः ॥ ४ ॥

पर् त पान् य्'मि समुय् मोन् ,
य्'मि हिहुय् मोन् दिन क्योह राथ् ।
य्'मिस्य् अदुयु मन् साम्पुन् ,
त्'मिय् ड्यूठुय् सुरगुरुनाथ् ॥ ५ ॥

आत्मा परो दिनं रात्रिर्यस्य सर्वमिदं समम् ।
भातमद्वैतमनसस्तेन दृष्टोऽमरेश्वरः ॥ ५ ॥

चिदानन्दस् ज्ञानप्रकाशस् ,
इमौ च्यूनुय् तिम् जीवन्ती मुक्ती ।
विषमिस् संसारनिस् पाशस् ,
अबुद्धव् गगडशत् शत् दितिय् ॥ ६ ॥

चिदानन्दो ज्ञानरूपः प्रकाशाख्यो निरामयः ।
यैर्लब्धो देहवन्तोऽपि मुक्तास्तेऽन्येऽन्यथा स्थिताः ॥ ६ ॥

नाथ् ना पान् ना पर् -ज़ोनुम् ,
सदा्यि बोदुम् एकुय् देह् ।
च्रह् ब्वह् ब्वह् च्रह् म्युलु ना ज़ोनुम् ,
च्रह् कुस् ब्वह् कस्स छुह् संदेह् ॥ ७ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

नाथ न त्वं न चात्मापि ज्ञातो देहाभिमानतः ।
स्वस्यैक्यं च त्वया तेन का आवामिति संशयः ॥ ७ ॥

शिव् वा केशव् वा जिन् वा ,
कमलज़नाथ् नाम् दा॒रिन् युस् ।
म्य अबलि का॑सितन् भवरुज् ,
सुह् वा सुह् वा सुह् वा सुह् ॥ ८ ॥

शिवो वा केशवो वापि जिनो वा द्रुहिणोऽपि वा ।
संसाररोगेणाक्रान्तामबलां मां चिकित्सतु ॥ ८ ॥

भान् गॅलु ता॑य् प्रकाश् आव् ज़ूने ,
चन्द्र गॅलु ता॑य् म्वतू चित् ।
चित् गॅलु ता॑य् केँह् ति ना कुने ,
गैय् भूर् भुवः स्वर् मीलिथ् कॅतु ॥ ९ ॥

भानौ नष्टे काशते चन्द्रबिम्बं
तस्मिन्नष्टे काशते चित्तमेव ।
चित्ते नष्टे दृश्यजातं क्षणेन
पृथ्व्यादीदं गच्छति क्वापि सर्वम् ॥ ९ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

वुथ् रैणया अर्जुन् सखर्,
अथि अल् पल् वखुर् ह्यथ् ।
यंदुवनय् ज्ञानख़् परमपद्,
अच्चर् हिशीखर् च्विशीखर् ह्यथ् ॥१०॥

उत्तिष्ठ शाक्तिकास्त्रि त्वं पूजयेशं सुरादिभिः ।
यदि ज्ञातमक्षरं तत्त्वया तेनापि का क्षतिः ॥ १० ॥

तन्त्र् गलि-तय् मन्त्र् म्वचे,
मन्त्र् गलु तय् म्वतुय् चित्त् ।
चित्त् गलु-तय् कँह् ति ना कुने,
शून्यस् शून्याह् मीलिथ् गौव् ॥ ११ ॥

तन्त्रं सर्वं लीयते मन्त्र एव
मन्त्राश्चित्ते लीयते नादमूलः ।
चित्ते लीने लीयते सर्वमेव
दृश्यं द्रष्टा शिष्यते चित्स्वरूपः ॥ ११ ॥

ह्यथ् करिथ् राज्य् फेरि ना,
दिथ् करिथ् तृप्ति ना मन् ।
लोभ विना जीव् मरि ना,
जीवन्त् मरि-तय् सुय् छुय् ज्ञान् ॥ १२ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

दातुर्मनस्तृप्यति नैव राज्यं
दत्त्वा ग्रहीतुश्च तदेव लब्ध्वा ।
जीवोऽपि लोभेन न मृत्युमेति
मृतस्य नैवास्ति न जातु मृत्युः ॥ १२ ॥

इमय् षह् च्य़ तिमय् षह् म्य,
श्यामगला च्य़ विन् तोठुस् छुह्
इहुय् भिन्नाभेद् च्य़ त म्य,
च़ह् षन् स्वामी ब्वह् षांयि मुषिस् ॥ १३ ॥

यदेव षट्कं ते देव तदेव च मम प्रभो ।
नियोक्ता त्वं नियोज्याहं तस्यास्तीत्यावयोर्भिदा ॥१३॥

शिव् गुरु तांय् केशव् पलनस्,
ब्रह्मा पायहर्यन् व्वलस्यस् ।
योगी योगकलि पर्ज़ान्यस्,
कुस् देव् अश्ववार् प्यठ् चेड्यस् ॥ १४ ॥

शिवोऽश्वः केशवस्तस्य पर्याणमात्मभूस्तथा ।
पादयन्त्रं तत्र योग्यः सादी क इति मे वद ॥ १४ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

अनाहत खस्वरूप शून्यालय्,
यस् नाव् ना वर्ण ना रूप ना गोत्र् ।
अहंनिनाद बिन्द् त यवोन्,
सुय् अश्ववार् प्यठ् चेड्यस् ॥ १५ ॥

अनाहतः खस्वरूपः शून्यस्थो विगतामयः ।
अनामरूपवर्णोऽजो नादबिन्द्वात्मकोऽस्ति सः ॥ १५ ॥

तूरि सलिल् खंटु तांय् तूरि
ह्यम्य त्रि गैय् भिन्ना भिन्न् विमर्शा ।
चैतन्य रव् भाति सब् समे,
शिवमय् चराचर् जग् पश्या ॥ १६ ॥

मायाजाड्यं तज्जडं बोधनीरं
संसृत्याख्यं तद्घनत्वं हिमं च ।
चित्सूर्येऽस्मिन् प्रोदिते त्रीणि सद्यो
जाड्यान्मुक्तं नीरमाद्यं शिवाख्यम् ॥ १६ ॥

देह वटा देवर वटा,
प्यठ ब्वन छुय् एकवाट् ।
पूज् कस् करख् हूटबटा,
कर् मनस् त पवनस् संगाट् ॥ १७ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

चैत्यं देवो निर्मितौ द्वौ त्वया यौ
पूजाहेतोस्तौ शिलातो न भिन्नौ ।
देवोऽमेयाश्चित्स्वरूपो विधेयं
तत्प्राप्त्यर्थं प्राणचित्तैक्यमेव ॥ १७ ॥

आ़सा बोल् प॑रिनम्र सासा,
म्य मनि वासा खेद् ना ह्यये ।
यदुवय् शंकर बख्च्च् आसा,
मकुरिस् स्वासा मल् क्याह् प्यये ॥१८॥

अवाच्यानां सहस्राणि कथयन्तु न मन्मनः ।
मालिन्यमेत्युदासीनं रजोभिर्मकुरो यथा ॥ १८ ॥

अछ्नान् आय् त गछुन् गछे,
पकुन् गछे दिन क्योह् व राथ् ।
योरय् आय् तूरि गछुन् गछे,
केँह् न-त केँह् न-त केँह् न-त क्याह् १६

जराऽऽगता क्षीणतरोऽद्य देहो
जातोऽवसायो गमनाय कार्यः ।
समागताः स्मो यत एव तत्र
गन्तव्यमेवेह दृढं न किञ्चित् ॥ १६ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

मूढव् दीशिथ् त पाशिथ् लाग् ,
ज़रु त कलु श्रुतवोन् ज़डरूपि आस् ।
युस् यियि दपियि तस् तिथु बोल्,
सुय् छुय् तत्त्वविदस् अभ्यास् ॥२०॥

ज्ञात्वा सर्वं मूढवत्तिष्ठ स्वस्थः
श्रुत्वा सर्वं श्रोत्रहीनेन भाव्यम् ।
दृष्ट्वा सर्वं तूर्णमन्धत्वमेहि
तत्त्वाभ्यासः कीर्तितोऽयं बुधेन्द्रैः ॥ २० ॥

गाल् गंडिन्यम् बोल् पंडिन्यम् ,
दपिन्यम् तिह् यस् यिथु रोचे ।
सहज़कुसुमव् पूज़् करिन्यम् ,
बूह् अमलांञ् कस् क्याह् म्वचे ॥ २१ ॥

निन्दन्तु वा मामथ वा स्तुवन्तु
कुर्वन्तु वार्चां विविधैः सुपुष्पैः ।
न हर्षमायाम्यथ वा विषादं
विशुद्धबोधामृतपानस्वस्था ॥ २१ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

दिन् छ्यज़ि त रज़न् आसे,
  भूतल् गगनस् कुन् विकासे ।
च़ंन्द्रि राह् ग्रोसुन् मावासि,
  शिव् पूज़न् ग्वाह् च़ित्त आत्मासि ॥२२॥

नाशं गतेऽर्के खलु मानसंज्ञे
  मेयत्वयाख्या रजनी विभाति ।
जीवाख्यचन्द्रः शिवधाम्नि लीनः
  स्वाहन्त्वराहुं ग्रसते च सद्यः ॥ २२ ॥

मनस् त भवसरस् छु त ,
  कोप निरता नार-ह्वख् ।
ल्यक लज़िताय् ब्वह् ना कुने,
  तुलि तुल् ताय् तूलु ना केँह् ॥ २३ ॥

क्रुद्धं मनो वह्निसमानरूपं
  तिरस्कृतं भारनतं विभाति ।
विचारतः सर्वविकारहीनं
  विशुद्धबोधैकस्वरूपमेव ॥ २३ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

शील् त मान् छुय् पा॑ञ्जि क्रञ्जय,
म्वछि य॑मि रं॑ट्‌ मल्लयुद्ध वाव् ।
हंस्त् युस् मस्तवाल गँडे,
तिह् यस् तगि सुह् अद न्यहाल् ॥ २४ ॥

शीलस्य मानस्य च रक्षणं भटै-
स्तैरेव शक्यं निपुणं विधातुम् ।
वायुं करेणाथ गजं च तन्तुना
यैः शक्यते स्तम्भायितुं सुधीरैः ॥ २४ ॥

षह् वन् चा॑टिथ् शशिकल् वुज़ूम् ,
प्रकृथ् हुज़ूम् पवनसूं॑तिय् ।
लो॑ल॑कि नार-सूं॑त्य् वा॑लिञ्ज् बुज़ूम् ,
शंकर् लं॑बुम् तमिय् सा॑ती ॥ २५ ॥

कामादिकं काननषट्कमेत-
च्छित्त्वामृतं बोधमयं मयाप्तम् ।
प्राणादिरोधात् प्रकृतिं च भक्त्या
मनश्च दग्ध्वा शिवधाम लब्धम् ॥ २५ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

च्चित्त् तुरुग् गगंनि भ्रमवोन्,
निमेष अकि छ्यडि योजनलछ् ।
चैतन्यवगि यमि रटिथ् ज़ोन्,
प्राण् अपान् फुटारिथ् पखच्य् ॥ २६ ॥

चित्ताभिधः सर्वगतिस्तुरङ्गः
क्षणान्तरे योजनलक्षगामी ।
धार्यो बुधेन्द्रेण विवेकवल्गा-
नोदेन वायुद्वयपक्षरोधात् ॥ २६ ॥

ख्यथ् गँडिथ् ना शमि मानस्,
श्रान्त् यिमव् त्रांवू तिम् गैय् खसिथ् ।
शास्त्र् बूज़ु ज़ि यमभंग् कूरु,
सुह् ना पंचु तांय् धन्या लूंसिति ॥२७॥

खादनाद्भूषणाद्वापि मनो यस्य गतभ्रमम् ।
स मुक्तो नोत्तमर्णाद्यो गृह्णात्यर्थं हि सोऽनृणः ॥ २७ ॥

यव तूर् चलि तिम् अम्बर् ह्यति,
बुछ यव चलि तिय् आहार् अन् ।
च्चित्त नृप स्वविचारस् प्यत,
च्चिता देहस् वान् क्याह् वन् ॥ २८ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

शीतार्थं वसनं ग्राह्यं क्षुधार्थं भोजनं तथा ।
मनो विवेकितां नेयमलं भोगानुचिन्तनैः ॥ २८ ॥

सहज़स् शम् त दम् नो गछे,
इछि प्रावख् मुक्तिद्वार् ।
सलिलस् लवण् ज़न् मीलिथ् त गछि,
तोति छुय् दुर्लभ् सहज़-विचार् ॥ २९ ॥

स्वभावलब्धौ न शमोऽस्ति कारणं
तथा दमः किं तु परं विवेकः ।
नीरैकरूपं लवणं यथा भवेत्-
तथैकताप्तावपि नैष लभ्यः ॥ २९ ॥

लोभ् मारुनु सहज़् विचारुनु,
द्रुग् ज़ानुन् कल्पन् त्राव् ।
निश छुय् त दूरु मव् ज़ानुनु,
शून्यस् शून्याह् मीलिथ् गौव् ॥ ३० ॥

लोभं त्यक्त्वा वैमनस्यं च तद्वत्-
कार्यो नित्यं स्वस्वभावावमर्शः ।
शून्याच्छून्यं नैव भिन्नं यथैवं
तस्मात्त्वं तद्भेदबुद्धिर्वृथैव ॥ ३० ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

मकुरस् ज़न् मल् च़लुम् मनस्,
अद म्य लंबूम् ज़नस् ज़ान् ।
सुह् ययलि ड्यूठुम् निश पानस्,
सोरुय् सुय् तांय् बुह् नव् केँह् ॥ ३१ ॥

चित्तादर्शे निर्मलत्वं प्रयाते
प्रोद्भूता मे स्वे जने प्रत्यभिज्ञा ।
दृष्टो देवः स्वस्वरूपो मयासौ
नाहं न त्वं नैव चायं प्रपञ्चः ॥ ३१ ॥

केँह् छिय् न्यंन्द्र्यहति वुदिय्,
केँच्चन् वुद्यन् न्यसर् प्यये ।
केँह् छिय् स्नान् करिथ् अपूतिय्,
केँह् छिय् गृह् बज़िथ् अक्रिय् ॥ ३२ ॥

कश्चित् प्रसुप्तोऽपि विबुद्ध एव
कश्चित् प्रबुद्धोऽपि च सुप्ततुल्यः ।
स्नातोऽपि कश्चिदशुचिर्मतो मे
भुक्त्वा स्त्रियं चाप्यपरः सुपूतः ॥ ३२ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

अकुय् ओंकार् युस् नाभि द्रे,
कम्बुय् ब्रह्माण्डस् सुम् गरे ।
अकुय् मन्त्र् युस् च्यतस् करे,
तस् सास् मन्त्र् क्याह् ज़न् करे ॥३३॥

आ ब्रह्माण्डं नाभितो येन नित्य-
मोंकाराख्यो मन्त्र एको धृतोऽयम् ।
कृत्वा चित्तं तद्विमर्शैकसारं
किं तस्यान्यैर्मन्त्रवृन्दैर्विधेयम् ॥ ३३ ॥

संसारस् आयस् तपसे,
बोधप्रकाश् लबुम् सहज़् ।
मर्यम् न कुँह् त मर न कँसि,
मर नेछ् त लस नेछ् ॥ ३४ ॥

आसाद्य संसारमहं वराकी
प्राप्ता विशुद्धं सहजं प्रबोधम् ।
म्रिये न कस्यापि न कोऽपि मे वा
मृतामृते मां प्रति तुल्यरूपे ॥ ३४ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

द्वादशान्त-मण्डल् यस् देवस् थंज़ूय् ,
नासिक पवन् अनाहत् रव् ।
स यस् कल्पन् अन्तिह् च़ंज़ूय्,
पानय् देव् त अर्चुन् कस् ॥ ३५ ॥

यो द्वादशान्ते स्वयमेव कल्पिते
सदोदिते देवगृहे स्वयं स्थितः ।
संप्रेरयन् प्राणरविं स शंकरो
यस्यात्मभूतः स कमर्चयेद् बुधः ॥ ३५ ॥

प्रथय् तीर्थन् गछान् संन्यासि,
ग्वारांनि सुदर्शन मिलु ।
च़िता परिथ् मव् निष्पत् आस्,
देशख् दूर्या द्रमन् नीलिय् ॥ ३६ ॥

यत्नेन मोक्षैकधियः सदामी
संन्यासिनस्तीर्थवरान् प्रयान्ति ।
चित्तैकसाध्यो न स लभ्यते तै-
र्दूर्वास्थलं भात्यतिनीलमारात् ॥ ३६ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

पवन् पूरिथ् युस् अनि वगे,
तस् ब्वन स्पार्शि न ब्वछ त त्रेश् ।
तिह् यस् करुन् अन्तिह् तगे,
सुह् संसारस् ज़्ययि न नेछ् ॥ ३७ ॥

यः पूरकेण चित्तं स्वं रोधयेत्क्षुत्तृडोदकम् ।
न पीडयति संसारे सफलं चास्य जीवितम् ॥ ३७ ॥

ज़ल् थमुनु हुतवह् तुरनावुन्,
ऊर्ध्व-गमन् परिवर्जिथ् च़र्यथ् ।
काठधेनि द्वद् श्रमावुन्,
अन्तिह् सकलु कपट-च़र्यथ् ॥ ३८ ॥

नीरस्तम्भो वह्निशैत्यं तथैव
पादैस्तद्वद्व्योमयानमशक्यम् ।
दोहो धेनोः काष्ठमय्यास्तथैव
सर्वं चैतज्जृम्भितं कैतवस्य ॥ ३८ ॥

कुसु पुशु तांय् कस्स पुशांज़ी,
कम् कुसम् लांगिज़्यस् पूज़े ।
कमि सर गंडु दिज़्यस् ज़लधांनी,
कवसन मंत्र शंकर् वुज़े ॥ ३९ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

क: पौष्पिक: कापि च तस्य पत्नी
पुष्पैश्च कैर्देववरस्य पूजा ।
कार्या तथा किं गडुकं विधेयं
मंत्रश्च कस्तत्र वद प्रयोज्य: ॥ ३९ ॥

मन् पुशु तांय् यछ् पुशांञी,
भार्वि्कि कुसम् लांगिज़्यस् पूज़े ।
शशि-रस गंडु दिज़्यस् ज़लधांनी,
छ्वपि मंत्र शंकर् वुज़े ॥ ४० ॥

इच्छामनोभ्यां ननु पौष्पिकाभ्या-
मादाय पुष्पं दृढभावनाख्यम् ।
स्वानन्दपूरैर्गडुकं च दत्त्वा
मौनाख्यमंत्रेण समर्चयेशम् ॥ ४० ॥

आयस् कमि दिशि त कमि वते,
गछ् कमि वति कव ज़ान वथ् ।
अन्तिहि दाय् लगि तते,
छ्यम् छनिस् फ्वकस् कस सथ् ॥ ४१ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

कया दिशा केन पथागताहं
पश्चाद्गमिष्यामि पथाऽथ केन ।
इत्थं गतिं वेद्मि निजां न तस्मात्
उच्छ्वासमात्रेण धृतिं भजामि ॥ ४१ ॥

गगन् च्रय् भूतल् च्रय्,
च्रय् द्यन् पवन् त राथ् ।
अर्घ् चन्दुन् पोष् पा॑न्ि च्रय्,
च्रय् छुख् सोरुय् त ला॑गिज़िय् क्याह् ॥ ४२ ॥

आकाशो भूर्वायुरापो ऽनिलश्च
रात्रिश्चाहश्चेति सर्वं त्वमेव ।
तत्कार्यत्वात्पुष्पमर्घादि च त्वं
त्वत्पूजार्थं नैव किंचिल्लभेऽहम् ॥ ४२ ॥

य॑मि लोभ् त मन्मथ् मोरू,
तिमय् मा॑रिथ् त लोगु॑नु दास् ।
य॑मिय् सहज़ ईश्वर् ग्वोरू,
त॑मिय् सोरुय् व्यन्दुन् स्वास् ॥ ४३ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

कामो लोभोऽहंकृतिश्चैव येन
यत्नात्पूर्वं मारिता मार्गचौराः ।
तेनैवैकेनैश्वरं धाम लब्ध्वा
सर्वं त्यक्त्वा भस्मवद्भावजातम् ॥ ४३ ॥

पानस् लागिथ् रूदुख् म्य च्रूह्,
म्य च्यह् छाडान् लूस्तुम् द्रूह् ।
ज्ञानस् मन्ज़् य्यलि ड्यूठुख् म्य च्रूह्,
म्य च्य-त पानस् दितुम् छ्वह् ॥ ४४ ॥

देहादिषट्कोशपिधानतस्त्वा-
मप्राप्य खिन्नास्मि चिरं महेश ।
उपाधिनिर्मुक्तविबोधरूपं
ज्ञात्वाद्य विश्रान्तिमुपागता त्वाम् ॥ ४४ ॥

कुश् पोष् तिल् दीफ् ज़ल् ना गछे,
युस् सद्भाव ग्वरकथ् मनि ह्यथे ।
शम्भुस् स्वरि पनंस् यछे,
सय् दपिज़े सहज़ा क्रिय् ॥ ४५ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

पुष्पादिकं द्रव्यमिदं न तस्य
पूजासु सर्वमुपयोगि किंचित् ।
गुरूपदेशाद् दृढया च भक्त्या
स्मृत्याच्यंते येन विशुद्ध आत्मा ॥४५॥

असे प्वन्दे ज़्वसे ज़ामे,
न्यथंय् तीर्थन् स्नान् करे ।
वंहरि-वहरस् नंनुय् आसे,
निश छुय् त पज़ानतन् ॥४६॥

स्नातं हसन्तं विविधं विधेयं
कुवन्तमेतत्पुर एव सन्तम् ।
पश्यात्मदेवं निजदेह एव
कृतं प्रदेशान्तरमार्गणेन ॥४६॥

यथ् सरि सर्षप-फलु ना व्यचे,
तथ् सरि सकलो पांञि च्यन् ।
मृग् स्ट्टगाल् गंण्डि ज़लहस्ती,
ज़्यन् ना ज़्यन् त तंतुय् प्यन् ॥४७॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

सरोवरे यत्र न सर्षपस्य
कणोऽपि मात्येव विचित्रमेतत् ।
विवर्धते तत्पयसा समस्तं
यावत्प्रमाणं खलु देहिजातम् ॥ ४७ ॥

लल्ल् ब्वह् लूछ़्स् छ़ाडान् त ग्वारान्,
हल् म्य कॅरुमस् रसॅनि शतिय् ।
वुछुन् ह्यॅतुमस् तारि डीठिमस् बरन् ,
म्य ति कल् गनेय ज़ि ज़ोगुमस् तॅतिय् ॥

द्रष्टुं विभुं तीर्थवरान्गताहं
श्रान्ता स्थिता तद्गुणकीर्तनेषु ।
ततोऽपि खिन्नास्मि च मानसेन
स्वान्तर्निविष्टा खलु तद्विमर्शे ॥ ४८ ॥

मल् व्वन्दि ज़ोलुम् ,
जिगर् मोरुम् ।
त्यलि लल्ल् नाव् द्राम् ,
य्यलि दॅलि त्रॉविमस् तॅतिय् ॥ ४९ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

ततोऽत्र दृष्ट्वावरणानि भूयो
ज्ञातं मयात्रैव भविष्यतीति ।
भङ्क्त्वा यदा तानि च संप्रविष्टा
लल्लेति लोके प्रथिता तदाहम् ॥ ४६ ॥

त्रयि न्यँगि सराह् सारिय् सरस्,
अकि न्यँगि सरस् अर्शस् जाय् ।
हर-मुख कौँसर अख् सुम् सरस्
सति न्यँगि सरस् शून्याकार् ॥ ५० ॥

वारत्रयं नीरमयं स्मरामि
तथैकदाहमवकाशहीनम् ।
आकाशमन्यान्यपि चाद्भुतानि
स्मरामि शून्यं खलु सप्तवारम् ॥ ५० ॥

ज़नञ ज़ायेय् रति तांय् क्रतिय्,
कॅरिथ् उदरस् बहु क्लेशा ।
फीरिथ् द्वार् भज़नि वांति तंतुय्
शिव् छुय् क्रूठ्-तांय् चेन् उपदेश् ॥५१॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

मसूदरं क्लेशयुतं विनीय
जातो मलाक्तोऽप्यनुयाति सन्ततम् ।
यत्प्रेरितः सौख्यधिया नरः स्त्रीं
कष्टेन लभ्यं शृणु तं गुरोः शिवम् ॥ ५१ ॥

स्वय् शिला छ्यय् पटस् त पीठस्,
स्वय् शिला छ्यय् उत्तम-देश् ।
स्वय् शिला छ्यय् फेरवंनिस् ग्रटस्,
शिव् छुय् क्रूंठु तांय् च्रेन् उपदेश् ॥५२॥

यथा शिलैकैव स्वजातिभेदात्
पीठादिनानाविधरूपभागिनी ।
तथैव योऽनन्ततया विभाति
कष्टेन लभ्यं शृणु तं गुरोः शिवम् ॥ ५२ ॥

रव मत थलि थलि तांपितन्,
तांपितन् उत्तम देशा ।
वरुण् मत लोट गर अंच्चितन्,
शिव् छुय् क्रूंठु-तांय् च्रेन् उपदेश् ॥ ५३ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

स्थले स्थले स्वैः किरणैर्यथा रविः
पतत्यभेदेन गृहेषु वाभ्रियम् ।
जलं तथा सर्वजगद्गृहेषु
कष्टेन लभ्यं शृणु तं गुरोः शिवम् ॥ ५३ ॥

सय् मातारूॅपि पय् दियें,
सय् भार्या-रूॅपि करि विलास् ।
सय् माया-रूॅपि ज़ीव् हरे,
शिव् छुय् क्रूॅठु तांय् च़ेन् उपदेश् ॥५४॥

मातृस्वरूपेण पयःप्रदा नु
भार्यास्वरूपेण विलासकारिणी ।
यच्छक्तिरन्ते मृतिरूपमेति च
कष्टेन लभ्यं शृणु तं गुरोः शिवम् ॥५४॥

कन्यव् गृह् त्यॅजि कन्यव् वनवास्,
यिथुय् छुख् त तिथुय् आस् ।
मनस् धैर्य् रठ् सॉपज़ख् सुवास्,
क्या छुय् मलुन् सूॅर् तांय् सास् ॥५५॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

गृहे निवासो न विमोक्षहेतु-
र्वनेऽथ वा योगिवरैः प्रदिष्टः ।
दिवानिशं स्वात्मविमर्शनाढ्यो
यथास्थितस्त्वं परमोऽस्त्युपायः ॥ ५५ ॥

ये ग्वरा परमो ग्वरा,
सद्भाव् भाव् त म्य च्यह् ।
ज़ह् ज़ानि उपनेय् कन्दापुरा,
हूह् कव तूरुनु त हाह् कव तंतु ॥ ५६ ॥

गुरो ममैतमुपदेशमेकं
कुरुष्व बोधाप्तिकरं दयातः ।
हाह्-हूह् इमौ स्तः सममास्यजाता-
वुष्णोऽस्ति हाह् किमथ हूह् सुशीतः ॥ ५६ ॥

नाभिस्थानस् च्नित् ज़लवंज़ी,
ब्रह्मस्थानस् शिशिरुनु मुख् ।
ब्रह्माण्डस् छ्यय् नद् वहवंज़ी,
तवय् तूरुनु हूह् हाह् गौव् तंतु ॥५७॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

नाभ्युत्थितो हाह् जठराग्नितप्तो
हूह् द्वादशान्ताच्छिशिरात्समुत्थः ।
हाह् प्राणभूतोऽस्त्यथ हूह् अपानः
सिद्धान्त एवं मुनिभिः प्रदिष्टः ॥ ५७ ॥

यिह् यिह् कर सुय् अर्चुन्,
यिह् रसंञि उच्चर्यम् तिय् मन्थुर् ।
इय् यिथ लग्यम् देहस् परिचय्,
सुय् परमशिवुन् तन्थुर् ॥ ५८ ॥

करोमि यत्कर्म तदेव पूजा
वदामि यच्चापि तदेव मंत्रः ।
यदेव चायाति तथैव योगाद्-
द्रव्यं तदेवास्ति ममात्र तन्त्रम् ॥ ५८ ॥

च्वह् ना ब्वह् ना ध्येय् ना ध्यान्,
गौव् पानय् सर्वक्रिय् मशिथ् ।
अन्या ड्यूठुख् केंह् ना अंनुय्,
गय् सत् लय पर् पशिथ् ॥ ५९ ॥

CC-0 S.P. Dhar Collection. Digitized by eGangotri

नाहं न च त्वं न च कापि चर्चा
ध्यानस्य योग्यात्र पदेऽतिशान्ते ।
कोऽप्यन्वयश्चात्र न भाति तस्मात्
विस्मार्य लीनं स्वमिवात्र सद्भिः ॥ ५६ ॥

छ्राडान् लूछ्रुस् पॉनिय् पानस्,
छ्यपिथ् ज्ञानस् वोतु न कूँछ् ।
लय् कॅरुमस् वॉचूस् मय्-खानस्,
बॅरि बॅरि बान त च्यवान् न कुँह् ॥६०॥

स्वात्मान्वेषणयत्नमात्रनिरता श्रान्ता ततोऽहं स्थिता
तज्ज्ञानैकमहापदेऽतिविजने प्राणादिरोधात्ततः ।
लब्ध्वानन्दसुरागृहं च तदनु दृष्ट्वात्र भाण्डान्यलं
पूर्णान्येव तथापि तत्र विमुखः प्राप्तो जनः शोचितः
॥ ६० ॥

श्रीलल्लायोगिनीवाक्यजातं षष्ट्या मया स्फुटम् ।
श्लोकानां भास्करेणेह दृब्धमस्तु शिवार्पणम् ॥ १ ॥

इति लल्लेश्वरी वाक्यानि राजानकभास्करकृतार्थ-
च्छायापद्योपेतानि समाप्तानि ॥

Printed by P. Vishi Nath and Sons, Photographers Srinagar

CC-0 S.P. Dhar Collection. Digitized by eGangotri

CC-0 S.P. Dhar Collection. Digitized by eGangotri

CC-0 S.P. Dhar Collection. Digitized by eGangotri

CC-0 S.P. Dhar Collection. Digitized by eGangotri

CC-0 S.P. Dhar Collection. Digitized by eGangotri